## अभ्यस्तस्य च। (३३/२४१७)

ह्वः इति वर्तते, तदभ्यस्तस्य इत्यनेन [1]व्यधिकरणम्। अभ्यस्तस्य यो ह्वयतिः। कश्चाभ्यस्तस्य ह्वयतिः? [2]कारणम्। तेनाभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात् सम्प्रसारणं भवति। जुहाव। [3]जुहूयते। जुहूषति॥

## बहुलं छन्दसि। (३४/३५१०)

ह्वः इति वर्तते। छन्दसि विषये ह्वयतेर्धातोर्बहुलं संप्रसारणं भवति। 'इन्द्राग्नी हुवे' (ऋ. ५.४६.३)। देवीं सरस्वतीं हुवे। [4]ह्वेञो लटि आत्मनेपदोत्तमैकवचने बहुलं छन्दसि इति शपो लुकि कृते सम्प्रसारणमुवङादेशश्च। न च भवति। ह्वयामि मरुतः शिवान्। 'ह्वयामि [5](विश्वान्) देवाँ (ऋ. ७.३४.८)॥

## चायः की। (३५/३५११)

'बहुलं छन्दसि' (६.१.३४/३५१०) इति वर्तते। चायतेर्धातोः छन्दसि विषये बहुलं की इत्ययमादेशो भवति। '[6]वियन्ता न्य१न्यं चिक्युर्न निचिक्युरन्यम्' (ऋ. १.१६४.३८)। लिटि उसि रूपम्। न [7]भवति। '[8]अग्नेर्ज्योतिर्निचाय्यः' (वा.सं. ११.१)[9]॥

## अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्ताः। (३६/३५१२)

छन्दसि इति वर्तते। [10]अपस्पृधेथाम् इति 'स्पर्ध सङ्घर्षे' (धा. पा. ३) इत्यस्य लङि आथामि द्विर्वचनं रेफस्य संप्रसारणम् अकारलोपश्च निपातनात्। 'इन्द्रश्च विष्णो यदपस्पृधेथाम्' (ऋ. ६.६९.८)। अपास्पर्धेथाम् इति भाषायाम्। अपर आह – स्पर्धेः अपपूर्वस्य लङि आथामि सम्प्रसारणमकारलोपश्च निपातनात्। 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५/३५४६) इत्यडागमाभावः। अत्र प्रत्युदाहरणम् अपास्पर्धेथाम् इति भाषायाम्।

आनृचुः, आनृहुः इति। 'अर्च पूजायाम्' (धा.पा. २०४), 'अर्ह पूजायाम्' (धा.पा. ७४०) इत्यनयोर्धात्वोलिटचुसि [11]सम्प्रसारणम् अकारलोपश्च [12] निपातनात्। ततो द्विर्वचनम्, उरदत्वम्, 'अत आदेः' (७.४.७०/२२४८) इति दीर्घत्वम्। 'तस्मान् नुड् द्विहलः' (७.४.७१/२२८८) इति नुडागमः। [13]'य उग्रा अर्कमानृचुः' (ऋ. १.१९.४)। 'न वसून्यानृहुः' (अ. वे. २.३५.१)। आनर्चुः, आनर्हुः इति भाषायाम्।

---

1. व्यधिकरणेन विशिष्यते ड. 2. यत् तस्य इत्यधिकम् क. ह. 3. चोहूयते जोहूयति क. 4. ह्वयते: फ. 5. विश्वे क, विश्वान् इति विश्वेदेवान् क. ह. विश्वान् ऋग्वेदपाठे नास्ति 6. निचिकीवान् निचिक्यु रन्यत फ. 7. च इत्यधिकम् ड. 8. अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् क.ड. 9. दीर्घोच्चारणं किमर्थम्। चिकीताम् इत्यधिकम् ह. 10. अपस्पृधेथाम् आनृचुः आनृहुः चिच्युषे तित्याज श्रातः श्रितम् आशीः अशीर्ताः इति शब्दाः निपात्यन्ते छन्दसि विषये इत्यधिकम् ब.क.ड.फ.ह. 11. च इत्यधिकम् ग. 12. निपात्यते फ. 13. यन्त्रा इति मुद्रितः पाठः